# कक्षा–6

# रुचिरा भाग 1

# पाठ 5 – वृक्षाः



## अभ्यासः

1. वचनानुसारं रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा– | वनम् | वने | वनानि |
| | जलम् | जले | जलानि |
| | बिम्बम् | बिम्बे | बिम्बानि |
| यथा– | वृक्षम् | वृक्षौ | वृक्षान् |
| | पवनम् | पवनौ | पवनान् |
| | जनम् | जनौ | जनान् |

**2.** कोष्ठकेषु प्रदत्तशब्देषु उपयुक्तविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत–

| | |
|---|---|
| यथा– अहम् रोटिकां खादामि। | (रोटिका) |
| क. त्वं जलं पिबसि। | (जल) |
| ख. छात्रः दूरदर्शनं पश्यति। | (दूरदर्शन) |
| ग. वृक्षाः पवनं पिबन्ति। | (पवन) |
| घ. ताः कथां लिखन्ति। | (कथा) |
| ङ. आवाम् जन्तुशालां गच्छावः। | (जन्तुशाला) |

K.Sharma

3. अधोलिखितेषु वाक्येषु कर्तृपदानि चिनुत –

क. वृक्षाः नभः शिरस्सु वहन्ति – वृक्षाः

ख. विहगाः वृक्षेषु कूजन्ति। – विहगाः

ग. पयोदर्पणे वृक्षाः स्वप्रतिबिम्बं पश्यन्ति। – वृक्षाः

घ. कृषकः अन्नानि उत्पादयति। – कृषकः

ङ. सरोवरे मत्स्याः सन्ति। – मत्स्याः

K.Sharma

4. प्रश्नानामुत्तराणि एकपदेन लिखत –

क. वृक्षाः कैः पातालं स्पृशन्ति ? उ. पादैः

ख. वृक्षाः किं रचयन्ति ? उ. वनम्

K. Sharma

ग. विहगाः कुत्र आसीनाः ? उ. शाखादोलायाम्।

घ. कौतुकेन वृक्षाः किं पश्यन्ति ? उ. स्वप्रतिबिम्बम्।

5. समुचितै पदैः रिक्तस्थानानि पूरयत –

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गजः | गजौ | गजाः |
| | अश्वः | अश्वौ | अश्वाः |
| द्वितीया | सूर्यम् | सूर्यौ | सूर्यान् |
| | चन्द्रम् | चन्द्रौ | चन्द्रान् |
| तृतीया | विडालेन | विडालाभ्याम् | विडालैः |
| | मण्डूकेन | मण्डूकाभ्याम् | मण्डूकैः |
| चतुर्थी | सर्पाय | सर्पाभ्याम् | सर्पेभ्यः |
| | वानराय | वानराभ्याम् | वानरेभ्यः |
| पंचमी | मोदकात् | मोदकाभ्याम् | मोदकेभ्यः |
| | वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| षष्ठी | जनस्य | जनयोः | जनानाम् |
| | शुकस्य | शुकयोः | शुकानाम् |
| सप्तमी | शिक्षके | शिक्षकयोः | शिक्षकेषु |
| | मयूरे | मयूरयोः | मयूरेषु |
| सम्बोधनम् | हे बालक! | हे बालकौ! | हे बालकाः! |
| | नर्तक! | नर्तकौ! | नर्तकाः! |

K.Sharma

6. भिन्नप्रकृतिकं पदं चिनुत –

क. गंगा, लता, यमुना, नर्मदा। – लता

ख. उद्यानम्, कुसुमम्, फलम्, चित्रम्। – चित्रम्

ग. लेखनी, तूलिका, चटका, पाठशाला। – चटका

घ. आम्रम्, कदलीफलम्, मोदकम्, नारंगम्। – मोदकम्

K.Sharma